३प्र० दर्शितम् । "रौरवयौश्राजये वार्हते ह्रचे भवतः" ता० ब्रा० । रौरवनरकस्वरूपादिकमुक्तं मार्कपु० १०अ० "रौरवे कूटसाक्षी तु याति यश्चान्वृतो नरः । तस्य स्वरूपं गदतो रौरवस्य निशामय । योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः । जानुमात्रप्रमाणश्च ततः श्वभ्रः सुदुस्तरः । तत्राङ्गारचयोपेतं कृतञ्च धरणीतलम् । जाज्वल्यमानस्तीव्रेण तापिताङ्गारभूमिगम् । तन्मध्ये पापकर्माणं विमुञ्चन्ति यमानुगाः । स दह्यमानस्तीव्रेण वह्निना तत्र धावति । पदे पदे च पादोऽस्य शीर्य्यते जीर्यते पुनः । अहोरात्रेणोद्धरणं पादन्यासं च गच्छति । एवं सहस्रं विस्तीर्णं योजनानां विपच्यते" ।

**रौहिण** पु० रुह-इनन् स्वार्थे अण् । १चन्दनवृक्षे त्रिका० । २रोहिणशब्दार्थे च ।

**रौहिणेय** पु० रोहिण्यां भवः ढक् । १बुधग्रहे, २बलरामे, च अमरः । ३मरकतमणौ न० राजनि० ४गोवत्से पुंस्त्री मेदि० ५शनैश्चरे पु० भगदैवतशब्दे ४६२१ पृ० दृश्यम् ।

**रौहिष** न० रुह-इषन् स्वार्थेऽण् ।१कत्तृणे मेदि० २मृगभेदे पुंस्त्री० अमरः । ३रोहितमत्स्ये च अजयपा० ।४दूर्वायां, ४रोहितमृग्याञ्च स्त्री ङीष् ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये रकारादि शब्दार्थसङ्कलनम् ।

---

## ल

लकारो व्यञ्जनवर्णभेदः । तस्योच्चारणस्थानं दन्तमूलम् । स्वर्गोष्मवर्णयोर्मध्यस्थत्वादयमन्तःस्थवर्णः । अस्योच्चारणे आभ्यन्तरप्रयत्नः जिह्वाग्रेण दन्तमूलस्य ईषत्स्पर्शस्तेनास्य ईषत्स्पृष्टता । बाह्यप्रयत्नाश्च संवारनादघोषाः अल्पप्राणश्च । मातृकान्यासेऽस्य ककुदि न्यस्यता । काव्यादौ प्रथमप्रयोगे व्यसनं फलम् । "व्यसनमथ लवौ" वृ०र०टी । तस्य स्वरूपं यथा "लकारं चञ्चलापाङ्गि ! कुण्डलीत्रयसंयुतम् । पीतविद्युल्लताकारं सर्वरत्नप्रदायकम् । पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा । त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा । आत्मादिसहितं वर्णं हृदि भावय पार्वति" कामधेनुतन्त्रम् । तत्पर्य्याया वर्णाभिधाने उक्ता यथा "लश्चन्द्रः पूतना पृथ्वी माधवी शक्रवाचकः । बलानुजः पिनाकीशो व्यापको मांससंज्ञकः । परायणा ककुद्वक्त्रः खड्गी नादोऽमृतं दिवि । लवणं वारुणीपीतशिखा वाणी क्रियाऽजिता । ज्वालिनी वेगिनीनादः प्रद्युम्नः शोषणो हरिः । विशालन्द्रायणी चेतो मेरुर्गिरि कलोरसः" । तस्याधिष्ठातृध्येयरूपं यथा "चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम् । सर्वदा वरदां भीमां सर्वालङ्कारभूषिताम् । योगीन्द्रसेवितां नित्यं योगिनीं योगरूपिणीम् । चतुर्वर्गप्रदां देवीं नागहारोपशोभिताम् । एवं ध्यात्वा लकारन्तु तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् ।

**ल** पु० ला—क । १इन्द्रे मेदि० तन्त्रोक्ते भूमिदैवताके २मन्त्रभेदे न० २एकलघुके वर्णे । लङादिदशसु लकारादि तिङ्प्रत्ययेषु "लः कर्म्मणि च भावे चाकर्म्मकेभ्यः" पा० ।

**लक** आस्वादे प्राप्तौ च चु० उभ०सक० सेट् । लाकयति ते अलीलकत् त ।

**लकच** पु० लक—बा० अचन् । लिकुचवृक्षे (माँदार) शब्दर० ।

**लकुच** पु० लक—उचन् । (माँदार) वृक्षभेदे अमरः ।

"लकुचः क्षुद्रपनसो लिकुचो डहुरित्यपि । आमं लकुचमुष्णञ्च गुरु विष्टम्भकृत्तथा । मधुरञ्च तथाम्लञ्च दोषत्रितयरक्तकृत् । शुक्राग्निनाशनञ्चापि नेत्रयोरहितं स्मृतम् । सुपक्वं तत्तु मधुरमम्लं चानिलपित्तकृत् । कफवह्निकरं रुच्यं वृष्यं विष्टम्भकञ्च तत्" भावप्र० ।

"लकुचं गुरु विष्टम्भि स्वाद्वम्लं रक्तपित्तकम् । श्लेष्मकारि समीरघ्नमुष्णं शुक्राग्निनाशनम्" वैद्यक० ।

**लक्तक** पु० लक—क्त नि० संज्ञायां कन् ।१अलक्तके (आलता) शब्दर० ।२जीर्णवस्त्रखण्डे (नेकड़ा) अमरः । [शब्दच०

**लक्तकर्म्मन्** पु० लक्तं करोति कृ—मनिन् । रक्तवर्णलोध्रे

**लक्तिका** स्त्री गोधायां त्रिकाण्डः । [लक्षत् त ।

**लक्ष** दर्शने अङ्कने च चु०उभ०सक०सेट् । लक्षयति ते अल-

**लक्ष** न० लक्ष—अच् । १पदे २चिह्ने ३व्याजे ४शरव्ये च । ५दशायुतसंख्यायां स्त्री०न० मेदि० ।

**लक्षक** त्रि० लक्षयति लक्षणयार्थम् लक्ष—ण्वुल् । लक्षणयार्थबोधके शब्दे । तल्लक्षणं श० प्र० उक्तं यथा "यादृशार्थस्य सम्बन्धवति शक्तन्तु यद्भवेत् । तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि" । "यादृशार्थसम्बन्धवति यन्नाम सङ्केतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे